MithyA-jnAna is not the AvaraNa over Brahman

The opponent (**O**) is a bheda-abheda-vAdi. His stand is that there is no need for a bhAvarUpa-ajnAna which is different from agrahNa, mithyA-jnAna and its samskAra. Rather, bhrAnti i.e. mithyA-jnAna itself can be called ajnAna.

The siddhAntI (**S**) asks as to what exactly is this bhrAnti which can be called ajnAna and is capable of covering the illumination of Brahma-swarUpa. **O** says that "Atma-buddhi in anAtmA starting from ahamkAra till body" in the form of "**अहं मनुष्यः**" is the bhrAnti which is ajnAna and is capable of covering the illumination of Brahman.

S says that it is not possible to prove that "**अहं मनुष्यः**" is a bhrAnti. This is on account of:

(a) non-bhrAnti-hood of "**खण्डो गौः**"; and
(b) non-difference between "**अहं मनुष्यः**" and "**खण्डो गौः**".

[***खण्डः refer to a cow with broken horns. मुण्डः refers to a cow which naturally has no horns.***]

O: But there is the availability of cognition in the form "न अहं मनुष्यः, अहं ब्रह्म अस्मि". Hence, there is a difference of "अहं मनुष्यः" vis-a-vis "खण्डो गौः". Your claim in (b) above regarding the non-difference of these two cognitions is incorrect.

S: Not so. Because there is the availability of cognition in the form of "न अयं **खण्डो गौः**, अयन्तु **मुण्डः**". This cognition arises when we see a **मुण्डः**. So, just as there is abheda of **गोत्व** with **खण्ड** and **मुण्ड**, similarly let there be abheda of AtmA with sharIra and Brahman. Why should "**अहं मनुष्यः**" be a bhrAnti. "**अहं मनुष्यः**" will be as valid as "**खण्डो गौः**".

O: But "अहं मनुष्यः" is like "इदं रजतम्". Just as there is nishedha of rajata in pratipanna-upAdhi idam, similarly there is nishedha of manushyatva in pratipanna-upAdhi AtmA by the cognition (from shAstra) "नाहं मनुष्यः".

S: Not so. When we see a **खण्ड**, then there is tAdAtmya of **खण्ड** in **गोत्व**. And then when we see another cow which is **मुण्ड**, then there is nishedha of **खण्ड** in the same **गोत्व** because we say "न अयं **खण्डो गौः**, अयन्तु **मुण्डः**". So, just as there is nishedha of rajata in pratipanna-upAdhi idam, similarly there is nishedha of **खण्ड** in pratipanna-upAdhi **गोत्व**. So, there will arise the contingency of bhrAnti-hood of even "**खण्डो गौः**" which you don't admit.

O: But खण्ड is negated in मुण्ड and not in गोत्व.

S: Not so. Because **खण्ड** is never imposed in **मुण्ड**. So, where is the need to negate it? **खण्ड** is imposed in **गोत्व**. And there itself is it negated (when **मुण्ड** is seen).

O: But pratipanna-upAdhi is not गोत्व. It is गोत्व-delimited-by-खण्ड. And there खण्ड is never negated. खण्ड is negated in गोत्व-delimited-by-मुण्ड. So, "खण्डो गौः" cannot be equated with "इदं रजतम्".

S: Well. Then in "**अहं मनुष्यः**" also, the pratipanna-upAdhi is आत्मा-delimited-by-मनुष्यत्व. And there मनुष्यत्व is never negated. Manushyatva is negated in आत्मा-delimited-by-ब्रह्मत्व. That is not the pratipanna-upAdhi. So, it will not be analogous to "**इदं रजतम्**".

O: But there is continuance of transactions in the form of "खण्डो गौः". But there is no continuance of transaction in the form of "इदं रजतम्". So, there is a divergence.

S: Here also there is continuance of transaction in the form of "**अहं मनुष्यः**" because even in mOksha, due to sarvAtma-bhAva, there will be identification with manushya-body.

O: But there are only five instances of bheda-abheda namely jAti-vyakti, guNa-guNI, kArya-kAraNa,visheshya-visheshaNa and avayava-avayavI. Since deha-AtmA-abheda is not one of these five, hence it is bhrAnti.

S: Not so. Admittedly, these five are not required to be present together for bheda-abheda. They are individually capable. And if they are individually capable, then instead of being five in number, let them be six in number. Please add even deha-AtmA-bheda-abheda i.e. sharIra-sharIrI-bheda-abheda. What is the obstacle? There is no obstacle. And if you don't accept the bheda-abheda of deha-AtmA without any justifiable reason, then you are prevented from accepting the bheda-abheda in rest five as well.

Thus, it transpires that your claim of "**अहं मनुष्यः**" cannot be proved to be a case of bhrAnti at all. And since it cannot be proved so, it cannot be called ajnAna and hence your claim of it being capable of covering Brahman is equally without merit.

Reference:

1. PanchapAdikA-VivaraNa

अत्र कश्चित् भेदाभेदाभ्यां सर्वसंकरवादी वेदान्तार्थगहनसम्प्रदायहीनः दुर्जरमणीयां वाचं जल्पति--न किल अग्रहणमिथ्याज्ञानतत्संस्कारेभ्यः अन्यत् सकलसंसारबीजभूतं अवस्थात्रयेऽपि अनपायि आसंसारविमोक्षात् दण्डायमानमज्ञानं नाम अस्ति, किं तु भ्रान्तिज्ञानं अग्रहणं वा अज्ञानं इति।।

अयं प्रष्टव्यः -- केयं भ्रान्तिः इति। अहंकारादिशरीरपर्यन्ते अनात्मनि आत्मबुद्धिः इति चेत्, अहो विस्मरणशीलता सर्वत्र सङ्कीर्णचेतसः। "खण्डो गौः" इत्यादिभेदाभेदप्रत्ययं प्रमाणमुपपादयन् "अहं मनुष्यः" इति प्रत्ययं भेदाभेदविषयं किमिति उपेक्षसे "नाहं मनुष्यः ब्रह्मास्मि" इति प्रत्ययसामर्थ्यात् इति चेत्, तन्न;"नायं खण्डो गौः, किं तु मुण्डो गौः" इति प्रत्ययेऽपि खण्डमुण्डाभ्यां गोत्वस्य अभेदवत् शरीरब्रह्मभ्यां जीवस्य अभेदप्रत्ययस्यापि प्रामाण्योपपत्तेः। इदंरजतवत् भ्रान्तिः इति चेत्, न;खण्डो गौः इत्यत्रापि तथात्वप्रसङ्गात्, "नायं खण्डो गौः, किं तु मुण्डः" इति व्यक्त्यन्तरे खण्डस्य गोत्वोपाधौ निषेधप्रत्ययसामर्थ्यात् तत्र व्यवहारानुच्छेदात् प्रामाण्यं इति चेत्, तत्--"अहं मनुष्यः" इत्यत्रापि तुल्यम्; मोक्षावस्थायामपि सर्वात्मत्वात् तव सर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात्। जातिव्यक्ति गुणगुणि कार्यकारण विशिष्टस्वरूप अंशांशि सबन्धाः यत्र विद्यन्ते, तत्र भेदाभेदौ, न शरीरात्मनोः; तेषामभावात् इति चेत्, तर्हि शरीरशरीरिसम्बन्धोऽपि गुणगुण्यादिवत् भेदनिमित्तं किं न स्यात् अन्यथा सर्वसङ्करवादितया क्षपणकशिष्यता चिरकालसमुपार्जिता बाध्येत।

2. VivaraNa Prameya Sangraha

यच्च तदीयं दुराग्रहान्तरं जाग्रात्स्वप्नयोरहं मनुष्य इति भ्रान्तिरेव ब्रह्मतत्त्वानवभासहेतुरिति, तदप्यसत्; तन्मते भ्रान्तेरस्या दुर्भणत्वात् । यथैव खण्डो गौर्मुण्डो गौरित्यत्रोभयसामानाधिकरण्येन गोत्वजातेरेकस्या

एवोभाभ्यामपि व्यक्तिभ्यां सह भेदाभेदौ प्रामाणिकावेव स्वीक्रियेते तथैवाहं मनुष्योऽहं ब्रह्मेति चैकस्य जीवस्य शरीरब्रह्मभ्यामुभाभ्यामपि सह भेदाभेदौ प्रामाणिकावेव किं नाऽङ्गीक्रियेते ? तथा चाऽहं मनुष्य इति देहात्मनोरभेदप्रत्ययोऽपि प्रामाणिक एव स्यात्, न तु भ्रान्तिः । "नाऽहं मनुष्यः, किन्तु ब्रह्म" इत्ययं शास्त्रीयनिषेधोऽपि "नाऽयं खण्डो गौः, किन्तु मुण्डः" इतिवदुपपद्यते । अथोच्येत प्रतिपन्नेदन्तोपाधौ यथा "नेदं रजतम्" इति निषेधः तथा प्रतिपन्नात्मोपाधौ "नाहं मनुष्यः" इति मनुष्यत्वस्य निषेधात् मनुष्यत्वप्रतीतिरात्मनि भ्रान्तिरिति, तन्न; तथा सति खण्डो गौरिति खण्डाकारेण प्रतिपन्ने गोत्वोपाधौ पश्चान्नायं खण्ड इति निषेधात् खण्डप्रतीतेरपि भ्रान्तित्वप्रसङ्गात् । न च वाच्यं मुण्डे खण्डो निषिध्यते, न तु गोत्वोपाधाविति; मुण्डे खण्डस्याऽप्रसक्तत्वात् । ननु खण्डव्यक्त्यावच्छिन्नं गोत्वं प्रतिपन्नोपाधिः, न च तत्र खण्डो निषिध्यते, किन्तु मुण्डव्यक्त्यवच्छिन्ने गोत्व इति चेत्, तर्हि प्रकृतेऽपि मनुष्यत्वावच्छिन्न आत्मा प्रतिपन्नोपाधिः । न च तत्र मनुष्यत्वं निषिध्यते, किन्तु ब्रह्मत्वावच्छिन्न आत्मनि । एवं सत्यनुगतेन गोत्वेन खण्डमुण्डव्यक्ती इवाऽनुगतेनाऽऽत्मना शरीरब्रह्मणी सम्बद्धे, ततः खण्डो गौरिति प्रत्ययवदहं मनुष्य इति प्रत्ययस्य प्रामाणिकत्वं दुर्वारम् । अथ तत्र व्यवहारानुच्छेदात् प्रामाण्यं तव, तत्प्रकृतेऽपि समानम् । त्वन्मते मोक्षावस्थायामपि सर्वोपादानकारणभूतेन ब्रह्मणा सर्वज्ञेनाऽभिन्नस्य जीवस्य सर्वात्मतया सर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात् । जातिव्यक्तिकार्यकारणगुणगुणिविशेषणविशेष्याऽवयवावयविसम्बन्धानां भेदाभेदप्रयोजकानां पञ्चानामप्यभावाद्देहात्मनोरभेदो भ्रान्तिरिति चेद्; मैवम्; पञ्चानामपि सम्भूय प्रयोजकत्वं तावद्व्यभिचारदर्शनादयुक्तम् । एकैकस्य प्रयोजकत्वे तु प्रयोजकबाहुल्यगौरवस्य त्वयैवाङ्गीकृतत्वात् शरीरशरीरिसम्बन्धोऽपि प्रयोजकः किं न स्यात् । एतस्याऽप्रयोजकत्वे तथैवान्येषामपि तदापादयितुं शक्यमिति न क्वाऽपि भेदाभेदौ सिध्येताम् ।